विद्या भवन बालिका विद्यापीठ लखीसराय

वर्ग दशम् विषय संस्कृत शिक्षक श्यामउदय सिंह

ताः- २६-०५-२०२० (बोर्ड बेस्ड क्वेश्चन)

अधोलिखितनाट्यांशं पठित्वा तदाधारितानां प्रश्नानां उत्तराणि संस्कृतभाषया लिखत –

#(सिंहासनस्थः रामः ।ततः प्रविशतः विदूषकेनोपदिश्यमानमार्गौ तापसौ कुशलवौ)

विदूषकः-- इत इत आर्यौ !

कुशलवौ – (रामम् उपसृत्य प्रणम्य) अपि कुशलं महाराजस्य?

रामः--युष्मद्दर्शनात् कुशलमिव ।भवतोः किं वयमत्र कुशलप्रश्नस्य भाजनम् एव ,न पुनरतिथिजनसमुचितस्य कण्ठाश्लेषस्य ।

(परिष्वज्य) अहो हृदयग्राही स्पर्शः।

(आसनार्धमुपवेशयति)

उभौ -राजासनम् खल्वेतत् ,न युक्तमध्यासितुम् ।

रामः --सव्यवधानं न चरित्रलोपाय ।तस्मादङ्क-व्यवहितमध्यास्यतां सिंहासनम् ।

(अङ्कमुपवेशयति)

उभौ—(अनिच्छां नाटयतः) राजन् !अलमतिदाक्षिण्येन ।

रामः- अलमतिशालीनतया ।

१.एकपदेन उत्तरत –

(i) सिंहासने कः स्थः?

(ii)कुशलवौ कस्य समीपम् अगच्छताम्?

२.पूर्णवाक्येन उत्तरत –

(i) कयोः स्पर्शः रामाय हृदयग्राही आसीत् ?

(ii)रामः कौ अङ्कमुपवेशयति ?

३.भाषिककार्यम् –

(i) अत्र 'उभौ' इति पदं काभ्याम् प्रयुक्तम् ?

(ii) संवादे 'अकुशलम् ', इत्यस्य पदस्य कः विपर्ययः आगतः?

(iii)'पात्रम्' इत्यर्थे किं पदम् अत्र प्रयुक्तं ?( iv)'तापसौ कुशलवौ ' अत्र विशेषण पदं किं?